सन्दितः,त्रि,(सं + दो अवखण्डने + क्तः।)बद्धः। इत्यमरः॥

सन्दिष्टं,क्ली, (सं + दिश + क्तः।) वार्त्ता। इति शब्दरत्नावली॥ कथिते, त्रि॥

सन्दिष्टार्थः, पुं, (सन्दिष्टोऽर्थो यस्य।) सन्देशहरः। इति केचित्॥

सन्दिहानः,त्रि,(सं+ दिह + शानच्।)सन्दिग्धः। यथा, जटाधरः।
"सन्दिहानः सांशयिकः संशयापन्नमानसः॥"

सन्दी, स्त्री, खट्टा। यथा। निषद्या खट्टिका सन्दी। इति त्रिकाण्डशेषः॥

सन्दीप्यः, पुं, मयूरशिखावृक्षः। इति शब्दचन्द्रिका॥

सन्देशः, पुं, ( सं + दिश + घञ्।) संवादः! इति शब्दरत्नावली॥ (यथा, मेघदूते। ७।
"सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणाम्॥")
स्वनामख्यातमिष्टान्नविशेषश्च॥

सन्देशवाक्, [ च् ] स्त्री, ( सन्देश एव वाक्।) संवादः। तत्पर्य्यायः। वाचिकम् २। इत्यमरः॥

सन्देशहरः, पुं, ( हरतीति। हृ + अच्। सन्देशस्य हरः।) दूतः। इत्यमरः॥ (यथा, रघुः। ३। ६६।
"तवैव सन्देशहरात् विशांपतिः।
शृणोति लोकेश! तथा विधीयताम्॥")

सन्देशहारकः, पुं, (सन्देशं संवादं हरतीति। हृ + ण्वुल्।) दूतः। इति हेमचन्द्रः॥

सन्देहः, पुं,(सं + दिह + घञ्।) एकधर्म्मिकविरुद्धभावाभावप्रकारकं ज्ञानम्। इति सिद्धान्तमुक्तावली॥ तत्पर्य्यायः। विचिकित्सा २ संशयः ३ द्वापरः ४। इत्यमरः॥ (यथा, महाभारते। ३। ५७। ११।
"तान् समीक्ष्य ततः सर्व्वान् निर्विशेषाकृतीन् स्थितान्।
सन्देहादथ वैदर्भी नाभ्यजानान्नलं नृपम्॥")

सन्दोहः,पुं, (सं + दुह + घञ्।) समूहः। इत्यमरः॥ (यथा, आर्य्यासप्तशत्याम्। ५८९।
"स्तननूतननखलेखालम्बी तव घर्म्मबिन्दुसन्दोहः।
आभाति पट्टसूत्रे प्रविशन्निव मौक्तिकप्रसरः॥")

सन्द्रावः, पुं, (सं + द्रु + "समि युद्रुदुवः।"३।३। २३। इति घञ्।) पलायनम्। इत्यमरः॥

सन्धा,स्त्री,(सं + धा + अङ्।) स्थितिः। प्रतिज्ञा। इति मेदिनी॥ (यथा, रघुः। १४। ५२।
"गङ्गां निषादाहृतनौविशेष-
स्ततार सन्धामिव सत्यसन्धः॥")
सन्धानम्। इति शब्दरत्नावली॥ सन्ध्या। यथा। सन्धा द्विजमैत्री पिष्टप्रसूः। इति भरतधृतवाचस्पतिः॥

सन्धानं,क्ली,(सन्धीयते यदिति। सं + धा + ल्युट्।) मद्यसन्धीकरणम्। इति नयनानन्दः॥ तत्पर्य्यायः। अभिषवः २। इत्यमरः॥ सन्धानी ३ सन्धिका ४। इति शब्दरत्नावली॥ सन्धीयते सन्धानं वंशाङ्कुरफलादीन् बहुकालं सन्धाय, यत् क्रियते। इति भरतः॥ सङ्घट्टनम्। इति मेदिनी॥ (यथा, कुमारे। ५। २७।
"मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्रशोभिना।
तुषारवृष्टिक्षतपद्मसम्पदां
सरोजसन्धानमिवाकरोदपाम्॥")
काञ्जिकम्। इति हलायुधः॥ मदिरा। अवदंशः। सौराष्ट्रम्। इति राजनिर्घण्टः॥ धनुषि बाणयोजनम्। यथा,—
"तदाशु कृतसन्धानं प्रतिसंहर शायकम्।
आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि॥"
इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः॥
अन्वेषणम्। इति लोकप्रसिद्धम्॥ ( सन्धिः। यथा महाभारते। ५। १०। ३३।
"एवं कृते तु सन्धाने वृत्रः प्रमुदितोऽभवत्।
यत्तः समभवच्चापि शक्रो हर्षसमन्वितः॥")
सन्दधातीति। सं + धा + ल्युः। धारके, त्रि। यथा, सुश्रुते। १। ४५।
"मधु तु मधुरं कषायानुरसं * * हृद्यं सन्धानं शोधनं रोपणमिति॥")

सन्धानिका, स्त्री, (सन्धानमस्त्यस्या इति सन्धान + ठन्।) खाद्यद्रव्यविशेषः। आचार इति भाषा। तत्करणप्रकारको यथा। अपक्काम्रफलानि विंशतिः राजिका शरावषोड़शैकभागमिता मरिचं तोलकद्वयं लवणं षट्तोलकं मेथिकाद्वितोलकं जीरकं तोलकद्वयं हरिद्रातोलकैकं नागरमुस्तकमेकतोलकं कृष्णजीरकं तोलकैकं एतौल्वा आम्रभिन्नं सकलद्रव्यं चूर्णयित्वा एकत्रीकुर्य्यात्। आम्रन्तु दीर्घं द्विखण्डं चतुष्खण्डं वा कृत्वा अष्ठीं दूरीकृत्य तदभ्यन्तरे पूर्व्वोक्तचूर्णं पूरयित्वा शलाकया विद्धाखण्डान्त्रवत् कुर्य्यात्। ततस्तैले निमज्जयेत्। इति पाकराजेश्वरः॥

सन्धानितः, त्रि, सन्धानविशिष्टः। सङ्घट्टितः। सन्धानशब्दादितप्रत्ययेन निष्पन्नः॥

सन्धानिनी, स्त्री, गोष्ठम्। इति केचित्॥

सन्धानी,स्त्री, (सन्धीयते यस्यामिति। सं + धा + ल्युट्। ङीप्।) कुप्यशाला। इति हेमचन्द्रः॥ सन्धानम्। इति शब्दरत्नावली॥

सन्धिः, पुं, (सन्धानमिति। सं + धा + किः।) राजादीनां षड़्गुणान्तर्गतगुणविशेषः। स तु स्वर्णादिदानेन बन्धुभिः प्रीत्युत्पादनात् मित्रीकरणम्। मेल इति ऐक्य इति च भाषा। तद्विवरणं यथा,—
"पनबद्धो भवेत् सन्धिः स्वयं हीनस्तमाचरेत्।
मर्य्यादोल्लङ्घनं नास्ति यदि शत्रोरिति स्थितिः॥
मर्य्यादोल्लङ्घनं यत्र शत्रौ संशयितं भवेत्।
न तं संशयितं कुर्य्यादित्युवाच बृहस्पतिः॥
बलवद्विग्रहीतः सन् नृपोऽनन्यप्रतिक्रियः।
आपन्नः सन्धिभावेन विदध्यात् कालयापनाम्॥
ये च दैवेनोपहता राष्ट्रं येषाञ्च दुर्गतम्।
बहवो रिपवो येषां तेषां सन्धिर्विधीयते॥
दुर्म्मन्त्री भिन्नमन्त्रश्च नीचधर्म्मरतश्च यः।
एतैः सन्धिं न कुर्व्वीत विशेषात् पूर्वपीड़ितैः।
सन्धिं हि तादृशैः कुर्व्वन् प्राणैरपि हि हीयते॥"
इति भोजराजकृतयुक्तिकल्पतरुः॥ * ॥
षोड़शविधसन्धिर्यथा,—
"बलीयसाभियुक्तस्तु नृपो नान्यप्रतिक्रियः।
आपन्नः सन्धिमन्विच्छेत् कुर्व्वाणः कालयापनम्।
कपाल १ उपहारश्च २ सन्तानः ३ सङ्गत-४ स्तथा।
उपन्यासः ५ प्रतीकारः ६ संयोगः ७ पुरुषान्तरः ८॥
अदृष्टनर ९ आदिष्ट १० आत्मादिष्ट ११ उपग्रहः १२।
परिक्रय-१३ स्तथोच्छिन्न-१४ स्तथा च परभूषणः १५॥
स्कन्धोपनेयः १६ सन्धिश्च षोड़शैते प्रकीर्त्तिताः
इति षोड़शकं प्राहुः सन्धिं सन्धिविचक्षणाः॥"
तेषां लक्षणानि। यथा,—
"कपालसन्धिर्विज्ञेयः केवलं समसन्धितः।१।
सम्प्रदानाद्भवति य उपहारः स उच्यते॥२॥
सन्तानसन्धिर्विज्ञेयो दारिकादानपूर्व्वकः।३।
सद्भिस्तु सङ्गतः सन्धिर्म्मैत्रीपूर्व्व उदाहृतः॥
यावदायुःप्रमाणस्तु समानार्थप्रयोजनम्।
सम्पत्तौ वा विपत्तौ वा कारणैर्यो न भिद्यते॥
सङ्गतः सन्धिरेवायं प्रकृष्टत्वात् सुवर्णवत्।
तथान्यैः सन्धिकुशलैः काञ्चनः स उदाहृतः॥४॥
द्रव्यात्मा कार्य्यसिद्धिस्तु समुद्दिश्य क्रियेत यः।
स उपन्यासकुशलैरुपन्यास उदाहृतः॥ ५॥
मयास्योपकृतं पूर्व्वं ममाप्येष करिष्यति।
इति यः क्रियते सन्धिः प्रतीकारः स उच्यते॥"
अन्यच्च।
"उपकारं करोम्यस्य ममाप्येष करिष्यति।
अयञ्चापि प्रतीकारो रामसुग्रीवयोरिव॥६॥
एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छति।
समं हि तत्प्रमाणेन स च संयोग उच्यते॥७॥
आवयोर्य्योधमुख्यैस्तु मदर्थः साध्यतामिति।
यस्मिन् पणस्तु क्रियते स सन्धिः पुरुषान्तरः॥८
त्वयैकेन मदीयोऽर्थः संप्रसाध्यस्त्वसाविति।
यत्र शत्रुः पणं कुर्य्यात् सोऽदृष्टपुरुषः स्मृतः॥९॥
यत्र भूम्येकदेशेन पणेन रिपुवर्ज्जितः।
सन्धीयते सन्धिविद्भिः स चादिष्ट उदाहृतः॥१०॥
स्वसैन्येन तु सन्धानमात्मादिष्ट उदाहृतः।११।
क्रियते प्राणरक्षार्थं सर्व्वदानादुपग्रहः॥१२॥
कोषांशेनार्द्धकोषेण सर्व्वकोषेण वा पुनः।
शिष्टस्य प्रतिरक्षार्थं परिक्रय उदाहृतः॥१३॥
भुवां सारवतीनान्तु दानादुच्छिन्न उच्यते।१४।
भूम्युत्थफलदानेन सर्व्वेण परभूषणः॥ १५॥
प्रतिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते।